# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.3.5.9** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः | |

| **प्र. क्र.** | **प्रथमान्वितिः (Unit 1)** | **गुणाः** |
|---|---|---|
| **प्रश्न १** | **निम्नलिखितासु द्वयोः व्याख्या कार्या।** | **१०** |
| १ | व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्। | |
| २ | नानुबन्धकृतमनेजन्तत्वम्। | |
| ३ | नानुबन्धकृतमसारूप्यम् | |
| **प्रश्न २** | **निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या।** | **१०** |
| १ | उभयगतिरिह भवति। | |
| २ | यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। | |
| | **द्वितीयान्वितिः (Unit 2)** | |
| **प्रश्न ३** | **निम्नलिखितासु द्वयोः व्याख्या कार्या।** | **१०** |
| १ | क्वचिदेकदेशोऽप्यनुवर्तते। | |
| २ | भाव्यमानेन सवर्णानां ग्रहणं न। | |
| ३ | उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। | |
| **प्रश्न ४** | **निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या।** | **१०** |
| १ | एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः। | |
| २ | प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्। | |

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितासु द्वयोः व्याख्या कार्या।** १०

१ सर्वे विधयश्छन्दसि विकल्प्यन्ते।

२ प्रकृतिवदकरणं भवति।

३ यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्।

**प्रश्न ६ निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या।** १०

१ यस्मिन्विधिस्तदादावल्ग्रहणे।

२ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।** १०

१ इण्-प्रत्याहारः केन णकारेण गृह्यते?

२ उद्देशम् अनतिक्रम्य किं भवति?

३ उद्देशेन कस्य ग्रहणं भवति?

४ 'संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः' इत्यत्र पृथक्-शब्दस्य कोऽर्थः?

५ अनुबन्धाः परमार्थतः एकान्ताः/ अनेकान्ताः भवन्ति?

६ सह वा प्रवृत्तिः सह वा निवृत्तिः केषां भवति?

७ 'एकयोगः' इत्यत्र कः समासो विद्यते?

८ एकदेशस्य अनुवृत्तिर्भवति / न भवति?

९ भाव्यमान-शब्दस्य कोऽर्थः?

१० भाव्यमान-उकारः सवर्णान् गृह्णाति / न गृह्णाति ?

११ 'यस्मिन्विधिस्तदादावल्ग्रहणे' कीदृशी परिभाषा विद्यते?

१२ सर्वो द्वन्द्वः कथम् एकवद्भवति?

१३ परशास्त्रं कस्मात् बलवद् भवति?

१४ कृताकृतप्रसङ्गी विधिः किम् उच्यते?

१५ सर्वाधिकं बलवत् किं शास्त्रं भवति?